संस्कृत वार्ता:

दिनाङ्क : 19/03/2026 सायम् - 06:20

आदौ मुख्यवार्ता:

- भारतीय-जनता-पार्टीति दलेन असम-विधानसभा-निर्वाचनाय स्वकीया अष्टाशीति-प्रत्याशिनां प्रथमा सूची प्रकाशिता । मुख्यमन्त्री डा. हिमन्त-बिस्वा-सरमा इत्येषः जालुकबारी-निर्वाचन-क्षेत्रात् प्रतिस्पर्धिष्यति ।
- भाजपा-दलेन केरल-विधानसभा-निर्वाचनार्थम् अपि एकोन-चत्त्वारिंशत् प्रत्याशिनां द्वितीया सूची निस्सारिता।
- पेट्रोलियम-प्राकृतिक-वातेन्धन-मन्त्रालयेन राष्ट्रव्यापी-वातेन्धन-आपूर्तेः शतप्रतिशतं सुनिश्चितता घोषिता, सहैव एल.पी.जी.-सञ्चयकरणं निरोद्धुं मन्त्रालयेन पदक्षेपाः उत्थापिताः।
- रक्षा-मन्त्री राजनाथ-सिंहः भारतं स्वदेशीय-ड्रोन-निर्माणस्य वैश्विक-केन्द्रं विधातुं मिशन-मोड इत्याख्यायाः कार्ययोजनायाः अनुपालनाय आह्वानं अकरोत् ।
- अद्य देशस्य विभिन्नेषु भागेषु चैत्र-नवरात्र-उत्सवः आरभ्यते। चैत्र-शुक्ल-प्रतिपद्, उगादि, गुड़ी-पड्वा, चेटी-चन्द्, नवरेह, साजिबु-चेराओबा इत्यादयः नूतनवर्षोत्सवाः अपि आचर्यन्ते।
- ऑर्लियन्स-मास्टर्स-बैडमिण्टन-प्रतिस्पर्धायां भारतस्य आयुष-शेट्टी अद्य फ्रान्स-देशस्य पैलेस-डेस-स्पोर्ट्स-क्रीडाङ्गणे एकल-पुरुष-वर्गस्य षोडश-चरणे जापान-देशस्य युदाई-ओकिमोटो इत्यनेन सह प्रतिस्पर्धां करिष्यति।

भाजपा-निर्वाचनम्

भारतीय-जनता-पार्टीति दलेन असम-विधानसभा-निर्वाचनाय स्वकीया अष्टाशीति-प्रत्याशिनां प्रथमा सूची प्रकाशिता । मुख्यमन्त्री डा. हिमन्त-बिस्वा-सरमा इत्येषः जालुकबारी-निर्वाचन-क्षेत्रात् प्रतिस्पर्धिष्यति । असम-राज्यस्य षड्विंशत्यधिकैकशतं विधानसभा-आसनेभ्यः मतदानं तावत् अप्रैल-मासस्य नव-दिनाङ्के एकस्मिन्नेव चरणे भविष्यति।

भाजपा-दलेन केरल-विधानसभा-निर्वाचनाय अपि एकोन-चत्त्वारिंशत् प्रत्याशिनां द्वितीया सूची निस्सारिता। दलस्य पूर्व-प्रदेशाध्यक्षः कुम्मनम-राजशेखरन इत्यसौ अरनमुला-क्षेत्रात् निर्वाचनद्वन्द्वे भागं भजिष्यति । अन्येषु प्रमुखेषु नामसु कासरगोडतः अश्विनी एम.एल., कोन्गडतः रेणु-सुरेशः सहैव चङ्गनाशेरीतः बी.राधाकृष्ण-मेनन इत्येते प्रत्याशिनः सन्ति। नवदिल्ल्यां ह्यः आयोजितायां भाजपा-केन्द्रीय-निर्वाचन-समित्याः मन्त्रणायां एतेषां नाम्नां अनुमोदनं कृतम्। केरलराज्ये अपि आगामि-मासस्य नव-दिनाङ्के एकस्मिन्नेव चरणे मतदानं भविष्यति। अत्रान्तरे, नामाङ्कनस्य अन्तिमः दिवसः सोमवासरः वर्तते, अतः राज्ये निर्वाचन-प्रचारः तीव्रगत्या प्रचलति।

भाजपा-दलेन विभिन्न-राज्येषु आगामि-विधानसभा-उपनिर्वाचनेभ्यः अपि स्वकीय-प्रत्याशीनां सूची समुद्घोषिता। दलानुसारं गोवा-राज्यस्य पोण्डा-क्षेत्रतः रितेश-रवि-नायकः, नागालैण्ड-राज्यस्य कोरिडाङ्ग-क्षेत्रतः दाओचियर-इम्चेनः च निर्वाचनद्वन्द्वं करिष्यति। कर्णाटक-राज्यस्य बागलकोट-क्षेत्रतः वीरभद्रय्या-चारन्तिमठः तथा दावणगेरे-दक्षिण-क्षेत्रतः श्रीनिवास-टी.-दासकरियप्पा इत्येतौ प्रत्याशिनौ घोषितौ। त्रिपुरा-राज्यस्य धर्मनगर-क्षेत्राय जहार-चक्रवर्ती इत्येतस्य नाम उद्घोषितम्। अयं निर्णयः भाजपा-अध्यक्षस्य नितिन-नवीनस्य अध्यक्षतायां केन्द्रीय-निर्वाचन-समित्याः उपवेशने स्वीकृतः। उपवेशनेऽस्मिन् प्रधानमन्त्री नरेन्द्र-मोदी, रक्षामन्त्री राजनाथ-सिंहः, गृहमन्त्री अमित-शाहः तथा च समित्याः अन्ये सदस्याः उपस्थिताः आसन्।

पश्चिम-एशियासङ्कटम्

सर्वकारेण उद्घोषितं यत् पश्चिम-एशियायाः साम्प्रतिक-घटनाक्रमेण देशे परिवहनार्थं पी.एन.जी. तथा सी.एन.जी. इति द्वयोः शतप्रतिशतं आपूर्तिः सुदृढीकृता। पेट्रोलियम-मन्त्रालयस्य संयुक्त-सचिवेन सुजाता-शर्मणा प्रोक्तं यत् विगत-सप्ताहद्वये प्रायः सपाद-लक्षं कौटुम्बिक-व्यावसायिक-संयोजनानि प्रदत्तानि। अपि च, विगत-त्रिषु दिनेषु षड्शताधिकपञ्चसहस्राधिकाः उपोक्तारः पी.एन.जी.-प्रणालिकां प्रति स्थानान्तरिताः अभवन्।

तया सूचितं यत् सप्तदश-राज्यैः व्यावसायिक-एल.पी.जी. इत्यस्य कृते आवण्टन-आदेशाः निर्गताः, आपूर्तिः च सर्वेषु राज्येषु केन्द्रशासित-प्रदेशेषु च प्रचलति। केन्द्र-सर्वकारेण राज्येभ्यः पी.एन.जी.-सञ्जालस्य विस्ताराय सहयोगः प्रार्थितः सहैव व्यावसायिक-एल.पी.जी. इत्यस्य दश-प्रतिशत-आवण्टनस्य प्रस्तावः उपस्थापितः । सा अवदत् यत् सर्वकारेण राज्येभ्यः सञ्चयकरणं तथा च कृष्ण-विपणनम् रोद्धुं निर्देशाः प्रदत्ताः। यद्यपि एल.पी.जी. इत्यस्य उपलब्धता अद्यापि चिन्तायाः विषयः अस्ति, तथापि तया स्पष्टीकृतं यत् भण्डारस्य पूर्णतः समाप्तेः कोऽपि सङ्कटः नास्ति। तया विज्ञापितं यत् अन्तर्जालीय-पञ्जीकरण चतुर्नवति-प्रतिशतं यावत् प्रवृद्धं, तथा च जनसामान्यानां मध्ये व्याप्तं भयजन्य-क्रयणं अधुना न्यूनं जातम्।

विदेश-मन्त्रालयेन उक्तं यत् फरवरी-मासस्य अष्टाविंशति-दिनाङ्कात् एतावता प्रायः द्वि-दशमलव-अष्टलक्षं भारतीयाः पश्चिम-एशियातः स्वदेशं प्रत्यागताः। अधिकारिभिः विज्ञापितं यत् सेफ-सी-विष्णु- अभियानस्य अन्तर्गतं निष्कासिताः पञ्चदश-भारतीय- नाविक-सदस्याः इराकतः स्वगृहं प्रत्यागच्छन्ति। नौवहन-मन्त्रालयेन पुष्टीकृतं यत् एकादशाधिक-षड्शतं भारतीय-जलपोताः पूर्णतः सुरक्षिताः सन्ति, व्यापारः च अविच्छिन्नरूपेण प्रचलति।

राजनाथ-रक्षासम्मेलनम्

रक्षामन्त्री राजनाथ-सिंहः आगामि-वर्षेषु भारतं स्वदेशीय-ड्रोन-निर्माणस्य वैश्विक-केन्द्रं विधातुं मिशन-मोड इति विशिष्ट-प्रणाल्या कार्यं कर्तुं आह्वानं कृतवान्। राष्ट्रीय-रक्षा-उद्योग-सम्मेलने भाषमाणः श्रीसिंहः भू-राजनीतिक-अनिश्चिततायाः मध्ये रणनीतिक-स्वायत्ततां सुदृढीकर्तुं , रक्षा-सज्जतां वर्धयितुं तथा च आत्मनिर्भरताम् अग्रे नेतुं सशक्तस्य ड्रोन-परितन्त्रस्य निर्माणे बलं प्रदत्तवान्।

तेनोक्तं यत् एम.एस.एम.ई. रक्षा-निर्माणस्य प्रमुख-स्तम्भरूपेण समेधते , येषु बहवः कृत्रिम-प्रज्ञा स्वचालनम् सहैव रोबोटिक्स्-क्षेत्रेषु निरताः सन्ति। सः एकस्य सुदृढस्य समावेशी-रक्षा-औद्योगिक-परितन्त्रस्य प्रति सर्वकारस्य प्रतिबद्धतां पुनः प्रतिपादितवान् ।

नवरात्रिः

राष्ट्रपतिपदासीना द्रौपदी मुर्मूः, उपराष्ट्रपतिः सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्रमोदी इत्येते चैत्र-शुक्ल-प्रतिपदः पावन-सन्दर्भे 'उगादि-गुड़ीपड्वा-चेटीचन्द्-नवरेह्-साजिबु-चेराओबा-प्रभृति-पर्वणाम् देशवासिभ्यः शुभकामनाः प्रदत्तवन्तः। तेलुगु-नववर्षस्य उगादि-उत्सवः सम्पूर्णे आन्ध्रप्रदेशे उत्साहेन आचर्यते। जनाः पारम्परिक-विधिभिः नूतनवर्षस्य स्वागतं कुर्वन्ति।

अद्य देशस्य विभिन्नेषु भागेषु चैत्र-नवरात्रि-उत्सवः अपि आरभ्यते। चैत्र-शुक्ल-प्रतिपदायां उगादि, गुड़ी-पड्वा, चेटी-चन्द्, नवरेह्, साजिबु-चेराओबा इत्यादयः नूतनवर्षोत्सवाः अपि आचर्यन्ते।

ईरान-आक्रमणम्

पश्चिम-एशियायां वर्धमाने अवसादे कतर-देशस्य महत्त्वपूर्ण-ऊर्जा-आधारभूत-संरचनायां आक्रमणस्य अनन्तरं अमेरिका-देशेन इरान्-देशाय सञ्चेतना प्रदत्ता। राष्ट्रपतिः डोनाल्ड ट्रम्पः अवदत् यत् कतर-देशोपरि इरान-कृतस्य प्रत्येक-प्रहारस्य प्रत्युत्तरं वाशिङ्ग्टन् प्रबलतया प्रदास्यति । यदि एतादृशाणि आक्रमणानि पुनरपि भवन्ति, तर्हि सः इरान-देशस्य 'साउथ पार्स' इति वातेन्धन-क्षेत्रं भेदयितुं शक्नोति। अधिक-विवरणं अस्माकं संवाददात्रा -

---

बैडमिण्टन

ऑर्लियन्स-मास्टर्स-बैडमिण्टन-प्रतिस्पर्धायां भारतस्य आयुष-शेट्टी अद्य फ्रान्स-देशस्य पैलेस-डेस-स्पोर्ट्स-क्रीडाङ्गणे एकल-पुरुष-वर्गस्य षोडश-चरणे जापान-देशस्य युदाई-ओकिमोटो इत्यनेन सह प्रतिस्पर्धां करिष्यति।

आयुष-शेट्टी गतरात्रौ स्वदेशीयं क्रीडकं किरण-जॉर्ज इत्येतं पराजित्य प्रागुपान्त्य-चक्रे प्रविष्टवान्।

एकल-महिला-वर्गे अनमोल-खरब इत्येषा तन्वी-शर्माणं विरुध्य प्रतिस्पर्धां करिष्यति। मालविका-बंसोड अद्य सायंकाले मलेशिया-देशस्य क्रीडिकायाः वोंग-लिंग-चिङ इत्यस्याः विरुद्धं प्रतिस्पर्धिष्यति।

।। इति वार्ता: ।।